न यत्नतः भूमावभ्यंतरे कुंडे दक्षिणाशादितः क्रमात् उत्तराशावधि यावद्द्याद्रेखासमस्त्रयं मत्स्य
भागान् समान्कृत्य यावत्पूर्वामुखं कृतं ४२ तन्मध्ये विन्यसेद्वान्यद्रेखाभ्यामुत्तरामुखा एवमुल्लिख्य
विधिना प्रोक्षयेत्कवचेन तु ४३ आच्छिन्नयेत्ततो दर्भैः रस्त्रमंत्राभिमंत्रितैः कुंडाग्निस्तिगणं सर्वं म-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततःपरिभूषयेत् ४४ कृत्वैवपक्षतादाक्षाकुंडसंस्कारमुत्तमं समभ्यर्च्यततोघ्योंघैमेध्यतःप्रणवेन
च ४५ तेनैवविधिनानाभिंपूजयेच्चंद्रसंन्निभां मेखलात्रयपूजायांतन्मंत्रंतुमपूजयेत् ४६ त-
तःस्वस्वयंपूज्यंमेखलात्रितयोरपि प्रधानपुरुषेशानंप्रणवत्रिनयेनतु ४७ अथैवंविलेपनैर्धूपे
रिष्ट्वाकुंडपुराद्विज चतुष्पथेतुकुंडस्थेसपुष्पंदर्भविस्तरं ४८ तन्मंत्रेणचविन्यस्यततोपर्ययेथ-
पूजयेत् आधारशक्तिपूर्वंतदासनंवैष्णवंपर ४९ तत्रनारायणाख्यायाशक्तिर्द्योतलक्षणालः
क्ष्माद्यतिपदप्राप्ताअमृतामृततेजिनी सर्वातिशयरूपाणासर्वशक्तिसमन्विता सौक्ष्ममार्गेणरू-
पेणसर्वसत्वांतरस्थित शाश्वतास्वष्टिमार्गेण अवतीर्यतदंबुजे पुराध्यानक्रमेणैवतन्मंत्रेण
तदंबुजात् तन्नामपदयुग्मेनसनमःप्रणवादिना रेचकेनविनिक्षिप्यकुंडतत्त्वयममध्यतः संपू-
ज्यगंधपुष्पाद्यैपद्ममुद्रांप्रदर्शयेत् उक्तमंत्रेणसंयुक्तामेवंकुर्याच्चसन्निधिं आरोच्चभगवच्छक्तै
र्वन्हेरुत्पादनायच आदायकर्णिजवाग्निसूर्यकांतोद्भवंतुता लोहपाषाणजंवाथअदुष्टमथलौ
किकं तेजसेताम्रपात्रेच्चमृन्मयेभिनवेतुवासंताडयवरुत्र्मंत्रेणासंप्रोक्ष्यशिरवयावत अर्चयेत्त
नयेनाथकवचेनाथगंठयेत् प्लावयेदमृतेनाथनेत्रसंमत्रनारद पूरकेणोपसंतत्त्वस्वान्मन्युप-
शनंनयेत् क्रमादनंतशक्तौतुप्राग्वदुद्धृत्ययोजयेत् सृष्टिक्रमेणतंभूयअवतीर्यपदासदं श-
क्षापदावधिर्यावस्मरेन्नाभिगतंततं प्रणवेनाथनाभिस्तमानिषोमात्मकोयजेत् सभिद्भिस्तिस्त्र
भिर्वैदादत्तमात्मनिरादरात् त्रयाणामपिविजेनतेनाभिन्नेनवाद्विज एकाहुतिप्रमाणेनतत्र-
स्थोद्बुध्यतेयया तेनमार्गेणवेद्युयाध्यात्वाचाज्यामृतंत्तदि ६२ ततःस्वमंत्रेणोच्छाप्यनाभिकुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

डाहुताशनं कृत्वादौ मणवं विभृतदंते त्वं धितं स्मरेत ६३ अशेषभुवनाधारमध्यस्थो हृदस्य योजये
त् अधजङ्घेष्यतस्यैव भूधरार्जैन्यसेत्ततः त्रैलोक्यैश्वपदे मूर्ध्नि बीजस्यास्य महामुने ततः क्रमेण
संयोज्य धरेशाद्यंच सप्तकं सुर्वसंज्ञपर्यंतं सप्तकस्यास्य योजयेत् उर्ध्वोर्ध्वाभ्यामनलंच मापान्व्याप्ति
नमप्यथ तेजसेपदमादाय ततः ससार्चिषोपदं स्वाहासमन्वितावन्हे मंत्रस्तावद्दशाक्षरः धूम्रशाद
शरीरं तु सच्छक्त्यालोकबोधकः विकल्पधूमनिर्मुक्तं सच्चैतन्य स्फुलिंगिनं नादांतेन तु विन्यस्यासि
द्धिमात्रेण पूर्ववत् पुरात्हृतेच पात्रस्थौ वन्हौ वन्हि विशुद्धये करद्वयेन संहृत्य कुंडे संप्रत्याभ्यानि-
क्षिपेत कुंडमध्यस्थितायास्तु शक्तिर्नारायणी वसा नासाग्रेण तयाचाम्नोयातं ध्यायेत्सदाहुतं-
त्रीन् सप्तपंचधा दद्यात्परिधीनद्धृदयेन वै वन्हे स्सद्बोधनार्थं चनेत्रमंत्रेणनारद पर्यग्निकरणः-
कुर्यांछृदयेनार्द्रपाणिना ततः स्वतोस्वमंत्रेण चतुर्दिक्षु त्रिधात्रिधा प्रागादौ तु यथामूलं तदग्रेष्ठ
दिनभवेत कुर्यास्तेरसमासं तु सर्वदात्मानउत्तरे उत्तरस्योपरि संस्थाप्य वन्हिकार्यापियोषिवत
मणिताप्राणयुगलेदर्भधायुगल तथा स्रुक्स्रुवद्वितयं चैवतस्तस्थालिमेवच ससंप्रास्यमूलेन
तद्विदद्यास्थिरोपरी प्रणीतापात्रमापूर्य तोयेन तदनंतरं तत्रासनवरे विष्णुं ध्यात्वामूलेन विन्यसे-
त् यागयज्ञपतिं देवमेवं संस्थाप्य चोत्तरे ७७ भदध्याष्टत्तोविप्रपरिधिं ल्हृदयेनतु पलाकाष्टोद्भ-
वास्याष्टौ सवर्णा हस्तसंमिताः ७८ वपूर्यत्वपरिणाहानां हरद्धस्तसंमितान् अन्येषांह्यंगुलंवि-
धिपरिवस्तनं द्विज यावदष्टकरं कुंडमतः कुर्यानकारयेत् विस्ताराणि ततो दष्टानेषु प्रष्टेल्हृदामुने
स्रुक्स्रुवाणच संस्कारमुपमामजाशनैः स्रुवं द्वादशधाशोध्यंमंत्रिणोष्टेनवारिणा तथैव द्विजश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वलस्कर्कसौ त्साद्धिषेनचसंसात्मस्लकुस्करुकंचैवशिरवामंत्रेण वेततः कुंडस्येनाग्निनातोष्णतयोन्नं
यंसुच्यते स्वतः तद्दंडमानेनमंत्रज्ञःतन्नकल्पयेसुरा दिर्घस्कुकुसिद्वयेकाष्टंविस्तारश्चषडंगुलं
दैर्घ्यादद्द्वयेनाप्यदंडमतइष्यतांतथा सद्यंगुलमानंतुरुत्वाछेषंतुशोषयेत् कुलत्संदंड मूलेतुकुर्यात
ग्न्याननंशुभं कर्णिकास्थियथादंडोजायतेमुनिसत्तम त्रिवलिस्त्वथवाशंखवतथादंडस्तथास्पगं रु
त्वाग्रस्यद्विधिभारा समासेनप्रयत्नतः अंगुलंवायथाभागस्यवैयुग्म्यंअग्रतःक्रमात् दंडोपेस्य
स्यभागस्यत्र्यंगुलःपरितःसमंततःकुर्याभितरवात सुलसं तन्मध्येपंकजंकुर्यात्प्रफ
लंवोर्द्धपल्लवं अथकोशंतुसंवीद्धिपंचसप्तपलोऽरुवं पत्रमध्येनिमग्नाच्चकर्णिकावैसकेसरा द्वाद
शारंवाहिश्चक्रंपद्मस्यास्यदलस्यच चक्रवात्येतुकर्तव्यं शंखकोणेचतुष्टये ततोग्रभागस्यमुने
पार्श्वयोरुभयोरपि रेकैकमंगुलंशोध्यः संविभज्याश्रिधाततः कंठमेकेनभागेनमध्यसोस्यद्वये
नवा विछिन्नमंवशाक्षोभ्यांमध्यमेकांगुलेनतु विस्तारकंतुल्यवर्यं षित्वाग्रतःपुरा॥ ॥इति
कुंडनारदपंचरात्रग्रंथःसंपूर्णः॥ ॥श्रीकृष्णार्पणमस्तु ७ श्रीदत्तात्रयार्पणमस्तु ७

अथकुंडतत्वप्रदीपग्रंथः१५

श्रीगणेशायनमः नत्वाच्युतब्रम्हमहेषमूर्तीरिष्टेषुपूर्तेषुयदंगमाद्यं सांगंसमंकुंडमनेकभे
दंब्रूतेलिखितंतदलभद्रसूरिः १ अष्टौतुयास्मिन्यरमाणवस्तत्स्रसमं प्रमाणंत्र्यसरेणुराघं अष्टाष्ट
घाताद्रथरेणुकेशालिसाद्वयूकायवकांगुलानि २ हस्तोंगुलैस्त्वजिनप्रसंख्यैर्मुष्टिप्रराल्निर्वसुभाग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हीनः कलांशहीनः प्रसृतः प्रकोष्ठः कनिष्ठिकाग्रांतमसान्वरत्नि ३ अंगुष्ठमध्यांकगमंगुलस्या-
न्मध्यांगुली मध्यमपर्वमात्रं यवैश्च षड्भिस्सप्तभिरष्टभिर्वा कनिष्ठमध्योत्तममंगुलंच ४ ऊर्ध्वैस्त्रिभिः
शालिभिरंगुलं वा यवस्तु गौरैः शरसर्षपैः स्यात् सिद्धांतमेतच्छ्रुतिमूलकं च कल्पोक्तमाश्रित्य वदाम
हेऽत्र ५ पः पंचमोंशः प्रपदोच्छ्रितस्य समस्थितस्याप्यथवोर्ध्वबाहोः यष्टुः सहस्तो जिनभागभ-
क्तोंगुलं यवाद्याः क्रमशोगजांशाः ६ दंडौ समौ कीलकबद्धमूलावन्येन मध्यांकयुतेन तिर्यक् योज्य
तु पाग्रसमतः पृथक्तौ कीलादिभिर्भारयुजां गुणादयौ ७ मूलेम्नदंडाग्रयुगेंकमध्यान्निर्यन्गतान्त
लविलंबिसूत्रं यस्यां स्खलेत्तां हि शिपूरयेच्च यावत्समस्यादितरत्खनेद्वा ८ सूत्रं यथा दंडग-
तांकमेति भूमिस्तथेयं समतां समेति प्राग्मार्जनाद्यैः परिशोधितायां सन्मंडपादीन्स्वयंचतस्यां
९ भूमिं परीक्ष्य स्मृतिवाक्यदृष्ट्या शास्त्रां गृहीत्वा निजवर्णयोग्यां पुण्याहमंत्रैर्द्विजवक्त्रसंस्थैः पूत-
श्च्यपंचांगशुभे विदध्यात् १० शणं च मौंजं शणसूत्रवेणुगोवालकौशेयकुशादिभूतं श्लक्ष्णं समं
ग्रंथिविहीनमब्धियवैः परिणाहमरोमशं च ११ सूचीसमाग्रः शरलैकतुष्टः षडंगुलैर्मूलपृथक्त्व शंकुः
अधोपि सूक्ष्माग्रसुगार्क पर्वदीर्घोन वांशैः कृतमंडलेंतः १२ स्थापः समेदिक्स्थित कीलकेंश्च स-
पादशंकुप्रमितैश्चतुर्भिः एकीकृताग्रैश्च शिरस्पृशाद्रिसमत्वमेत्येकशिरासशंकुः १३ शंकुप्रमाणा
धिकविस्तरार्द्धहृत्तेयतः संविशति प्रभाग्रं यतो बहिर्याति च शंकुभाग्रं प्राचीतयोश्चिन्हगुणाप्रदानात्
१४ शंकुप्रभासप्रवियोगमध्यघटीहृतश्चरस्वनयानमिष्टैः भक्तांतरंस्वचतुर्विभागलब्धमाकचिन्हतः
श्चालनमायनांशं १५ प्राच्यंतयोर्मध्यविलंघनेन वृत्तार्द्धयोर्मत्स्यगतामुदीचीं मित्वादिगूग्रदय-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतोविदिक्षु झषेषु सूत्रैश्चतुरस्रमुक्तं १६ अथाधममध्यमोत्तमाः मंडपाः वसुदिग्य
विशाक्कलाधृतिभिर्युगलघुमध्यमस्तूत्तमकान् इह मंडपमध्यगुणान्विबुधाः कथयंति यथाय
तविस्तृतिभिः १७ करविंशतिजं निजहस्ततं तदशनैः परमोत्तममब्जके मुखछतिमर्द्धकरामथवे
ककरापरितः सुसताञ्च सृजेत् १८ त्रिषु वक्रचतुष्कमिह क्रमशः कुकुवंतरतः करयुग्मततं चतुरष्ट
मितांगुलिकृद्वियुगछ्रितिरत्र हि मंडपसंभमिता १९ त्रेधा मध्यगुणं विभज्य परितोऽष्टौ कोष्टकान् सं
लिखन्मध्ये वेदिमिहाब्धिकोणसहितां पक्वेष्टकाभिः सृजेत् उच्छ्रायोऽत्र गुणाब्धिभूतनगनिध्येका
दशांशेन वा कोणेषूत्तममंडपार्द्धविमितान्स्तंभान्सचूडान्वितान् २० सोणिरोपितपंचमाराक
लितानाग्नेयगर्त्तोदितो मध्ये स्वेष्टकरांध्रिखासुवलिकारंभार्पितां सर्वतः अन्यान्कोष्ठेषु पंचह
स्तविमितांस्त्रेधाविभक्तांतरे स्तंभान्स्थूलसमर्जुतुल्यसरलान्कोणेषु सारद्रुजान् २१ स्तंभचूड
गतमध्यगसूत्रं मूलकेंद्रगतमप्यवनिस्थं तच्च कोणमभिकल्प्य विदध्याद्वेदिपीठगृहमंडपकोणा
न् २२ उत्तमेषु सकलेषु मंडपेष्वात्मविस्तृतिदलोच्छ्रितान्यपि वेदिकोणसहितान्दृढान्खनेन्म
ध्यउन्नतिमिहार्थतो नयेत् २३ स्तंभकर्णमधिरूढदारुकश्छिद्ररोपितबलिः शिखासुवाकोणकाष्ठ
रचनाभिमंडितश्छादयेदुपरि मंडपः कटैः २४ सांद्रमेव तृणजैश्च वंशजैर्नारिकेलकदलीजपल्लवैः
द्वारवर्जमिह तैः परिश्रयेत् क्षौमचामरवितानभूषणैः २५ मार्गकोणतरुकूपविघ्नमस्तंभविद्धद
मिष्टनाशकृत् अंतरं तु यदि भिन्नमार्गयोरुच्छ्रयाद्द्विगुणमप्यतो न दुष्यति २६ अश्वत्थमोर्ज्यैर्जास्थिसज
न्यग्रोधजं पूर्वमुखासु दिक्षु प्लक्षाद्यमाश्वत्थदतीयकं वा न्यग्रोधकप्लक्षविपर्ययं वा २७ त्रिषु-

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रमात्पंचरसाद्विहस्तदीर्घंच तत्वाग्वियुतं युतं वा सुदृढ्दृशाखं त्वचनौ निरखेयं शरांशकं वाकरसंमि
तमा २८ कम्प्यंगुलैस्तत्परिधिः पृथुत्वं दीर्घिभ्र जंबूखदिरामृतालं शमीभवं तोरणमेकजं वा यज्ञाहं वृ
क्षोद्भवमन्यजं वा २९ द्वाभ्यां बहिर्युग्मकरैकहस्तवेधुच्च मानेष्वथ सन्निधौ वा निश्छिद्रमार्द्रक्षुसमं स-
चूड शृंगादिभिर्मोत्रितमव्रणंच ३० द्विहस्तदीर्घफलकं कराब्धिकरार्द्ध वृद्धं त्रिशुतिर्यगंन्यसेत् शा-
खादलं वात्मबिलेनचूडासूपात्यभाग संरलक्रमेण ३१ कीलस्कमध्ये फलकस्य वेदैः सार्द्धाब्धिभिः
पंचभिरंगुलैश्च विष्णुप्रियेकर्मणि शंखचक्रगदाब्जवत्तत्तरुसंभवास्युः ३२ स्तंभार्कमानेनच
कीलकास्ते यद्वार्कमानाः फलकस्य दैर्घ्यात् चक्रंहि सर्वासु च दिक्षु वास्यान्मूलघटद्दह मयांकुशञ्च ३३
शैवेशूलनिभानवांगुलिमिताः साब्ध्य शराविस्तारिताः शल्यष्यंगुलयोनस्युं गरुजवो वक्त्राग्रपार्श्वद्वयाः-
हीनेमध्यमउत्तमेशयुगलं युग्मं मृद्वद्धूयते शल्यैः शैककह्वद्विगाः करमिताः सर्वेन्च केचिज्जगुः ३४ शू
लत्रयं भवति चेत्फलकस्य मध्ये भांतद्वयं प्रतिदिशं विशतित्रिशृंगं विस्तारदैर्घ्य विलशल्पविधीयघो-
क सिंदूररत्ननिचयैरपि भूषितंच ३५ घंटादर्पणतुर्यवस्त्रकदलीपूगाम्रकथ्थीफलस्तंभैः पत्रफलैश्च
चामरकुशास्रग्गंधरत्नादिभिः नानापल्लवपुष्पकिंकिणिनटैः सत्पट्टकूलैर्गजैरश्वैर्भांडिवितानभोज्य
निचयैर्मालादिभिर्भूषयेत् ३६ न्यसेद्दिक्षु सुपंचहस्तविमिताहस्तद्वयविस्तृता हस्तिदक्षिलुलायसिं
हमकरेणाश्वर्षभैश्चित्रिताः स्वकेशानसमानवर्णतनवः काष्टागजैर्वाध्वजाः पंचांशावनिवेशितेषुनि
हिताद्दिग्ध्वस्तदंडेषु ते ३७ पूर्वैशानविमध्यतोपिनवमो हंसांकितोर्कप्रभः सौपर्णीकहितो वलाहकरुचि
र्घोरमतीच्योरपि अन्येकोष्टपभांकितः सितपिशंगाद्यैः सुचित्रः शुभो यत्पुच्छः शिखरोपरि त्रिवितः-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोदिग्धस्तदीर्घोमहान् ३८ दीर्घाःसप्तकरैःस्वरांशाविपुलाविंशांगुलावाक्रमाद्ध्योकेशानसमानवर्ण
रुचयोदिग्धस्तवंशाग्रगाः वज्राद्यायुधभूषणाहिमगिरेर्वर्णाशिवेब्रह्मशयोर्मध्योर्दिश्रुपराश्चताःशा
रलवस्मानाःपताकाअपि ३९ महेंद्रःपिशंगःशिखिहेमवर्णोयमःकृष्णावर्णस्तथानीरुतिश्च हिमा
भश्च सम्रातहरिर्मातरिश्वाविचित्रोधनेशःसुगौरोमहेशः ४० विधिर्लोहितोमेघवर्णस्त्वनंतोदिगी-
शानवर्णा अमिसुमसिद्धा सुवज्रंचशक्तिस्तथादंडखड्गसपाशांकुशोसद्गदाशूलपद्मे ४१ चतुःस्र
क्रियोनींदुखंडंत्रिकोणंसुवृत्तंषडस्रंचपद्माष्टकोणं पदंमज्यवेद्याश्चपूर्वेशयोःस्याच्चतुःकोटिकंव
र्तुलंसर्वतोवा ४२ अथकुंडनिवेशनमाह भवेद्दिक्षुरौद्र्यांचवेसंचकुंडांचतुकोटिचं
द्रार्द्धवृत्तंचपद्मं चतुस्रंक्रिवावर्तुलंत्वीषकोणेथवासर्वतोवृत्तवेदास्रकाणि ४४ चतुःकुंडपक्षेचतुर्दि
क्षुवास्युश्चतुःकोटिकंवर्त्तुलंवैककुंड्या शिवप्रीतिकार्येविशेदीशकोणेपिवासौम्यवारुण्यमध्येद्वदिसु
४५ चतुष्कोणवृत्तार्द्धचंद्रत्रिकोणान्यथोविप्रराजन्यवैश्यांघ्रिजेषु प्रधानानिवर्णेषुसर्वेषुवास्याच्च-
तुष्कोणकंमुख्यमंत्रास्तकार्ये ४६ स्तंभेप्रयोगेमारणेवैरकृत्येशांतावुच्चाटेन्चपुष्टौविमुक्तौ वेदाश्चादी
न्येषुशस्तानिवेद्याःपादंत्यत्कावज्रिमुख्यासुदिक्षु ४७ फलांतरमाह सिद्धिंपुत्रान्शोभनं-
वैरिनाशंशांतिंछेदंवृष्टिरोगप्रणाशौ यच्छंत्यैंद्र्याद्यासुदिक्षुस्थितानिवेदाश्व्यादीन्यत्रकुंडानियष्टुः ४८
भूतोच्छेदेचाभिचारप्रशांतौकुर्यात्कुंडे पंचसप्तास्त्रिसंज्ञे प्रांकुंडादीन्यत्रनित्यानिसर्वाण्याकारास्त-
त्यर्थवादश्रुतीच ४९ एवंकुंडकारणान्युक्त्वाश्चाहुतिपंच्या विस्तारेणकुंडप्रमाणमाह पं ४५
चाशहोमेथशतेसहस्रेतथायुतेलक्षहुतेच पंक्तौ कोटौचकुंडान्यथरत्नरत्निहस्तद्विवेदत्तुंगजक्रमेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षैकतोलक्षविवृद्धिमानेयावद्भवेल्लक्षदशांतहोमः तावत्स्वनेत्रांकिकरैरकहस्तादेकैकहस्ता-
धिककुंडमत्र ५१ लक्षार्द्धहोमेत्रिकरंवदंतिदिग्लक्षकेपंचकरंचकेचित् षड्हस्तकुंडनखलक्षमाने-
कोट्यर्द्धहोमेकरसप्तकंच ५२ गजार्कैःकलाविंशसंख्यांगुलैर्वाक्रमाच्चंद्रपक्षाधिरूत्वष्टहस्तैः शतार्द्धे
शतेपंचनिघ्नेदशघ्नेयुतेलक्षदिग्लक्षकोटयर्बुदेस्युः ५३ न्यूनेहिकुंडेऽधिकसंख्यहोमोनहीनमात्रो-
धिकसंख्यकुंडे उक्तप्रमाणांतरमानहोमोनुपाततश्चावयवप्रभागैः ५४ समंततोवेदकरप्रमाणंकुं-
डंयथाषोडशहस्तमात्रं स्कांदेचयत्कोटिहुतौप्रयुक्तंतत्स्थूलहव्यैकविभिःप्रदिष्टं ५५ विस्ताररज्जुं-
द्विगुणामथान्त्यपाशद्वयारज्जुदलेतदर्द्धे शंक्वर्धकर्षार्थनिरंछनाभ्यांसुलक्षितांमान्त्रिगुणांत्यशंकोः-
५६ पाशद्वयंन्यस्यनिरंछनेनविकर्षणाद्दक्षसमीरणांशोः श्रोणिद्वयंस्याच्छिवशर्वयोश्चस्याद्दश-
युग्मंचतुरस्रकुंडे ५७ निजांशवेदाश्विणिसूत्रमस्र ५-१-२ चंद्राक्षिभिःपंचखहग्गुणैर्वा संवर्द्ध्यति
र्यक्स्थितमध्यसूत्रप्रांतद्वयाभ्यांप्रयुगंमृग्याग्रात् ५८ तत्तोस्यायासूत्रयुगस्यमध्याच्छ्रोणीस्य-
वेदाश्वियुगेवहिर्द्वौवृत्तार्द्धयुग्मंरचयेत्कला १६ दि ७ रुत्वि ६ दु १ विष्कुंभयुतंभभागे ५९ अ-
थप्रकारांतरेणयोनिकुंडं क्षेत्रेनिजांशाटयगुणेपुरस्ताद्वेदांगुलाघ्यंगयवैर्विषिताग्रे श्रोण्यो-
स्तदर्द्धार्द्धतयात्रियूकासहेववाघृत्तदलेवहिस्तः ६० लिखेदयाभ्यामनुसूत्रयुग्ममाग्रांतमत्रप्रयु-
गंयथास्यात् पुत्रप्रदंभोगदमग्निकोणेकुंडंभवेद्योनिनिभंध्रुवाग्रं ६१ अथार्द्धचंद्रं जिन
२४ लवचतुरस्रेदृग्गुणे २-३-५ स्वंगुलाद्यर्द्धगनलग्गुण २-३-३ कैर्वामध्यसूत्राधरोर्द्धे वि-
रहितउपरिज्यासूत्रदानाच्चतिर्यक्भवतिततइहार्द्धेप्रामणादर्द्धचंद्रं ६२ अथत्र्यस्रिकुंडं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माह क्षेत्रे जिनां २४ शविमिते द्विभिरब्धिवेदैः ७.४.४ संवर्द्धितेंतरगुणे सममंगलाद्यैः श्रो-
ण्योः प्रथग्रस ६ मितांगुलिभिर्यवाभ्यां सूत्रैस्त्रिभिस्त्रिभुजमुत्तममत्रकुंडं ६३ अथवृत्तकुंडं
क्षेत्रे जिनांशे कलयाविभक्ते त्येकांश संवर्द्धितपूर्वभागे यूकाभिरन्नत्रिभि २ रेधिते वाप्यंतस्य चिन्हा
द्भ्रमणात्सुवृत्तं ६४ अथ षडस्रा निजांशे मध्यसूत्रमिंदुबाणदृग्युगैः क्रमात् बहिः प्रवृद्धस
वेदिशुन्यांगुलादिभिस्ततः ६५ मिमाय वेदकोणमग्रपृष्टिकोटिमध्यतः पुरोगुणाभितोद्विराषव-
न्हिवेदसमितैः ७.३.३.४ (६६) पृथग्विलिख्य तिर्यगंतसूत्रगाग्रयोर्लिखेत् विहायकोणभू
र्भवेत्षडस्रिकुंडमुत्तमं ६७ निजांश २४ वेदाब्धिगिसूत्रकेंतर्वस्वंशेकान्यासदलेन वृत्तं सार्काणिका-
स्याद्द्विगुणेन तद्वत्स्युः केसरास्त्रिगुणेन मध्यं ६८ स्यादूर्ध्वभूराद्विगुणेन तद्वत्यूर्णेंदुचंद्राब्धिरसो
नितेन वृत्तं तथा पञ्चगुणेन कुर्याद्धित्वाष्टुवोर्ध्वं रचयेद्दलानि ६९ वेदाब्धिविष्कंभमिते थवृत्तेन वेकफ
स्त्तुभिरंगुलाद्यैः ज्यासूत्रकाण्यष्टमितानि दद्यात्पूर्णाद्विदृग्वेदकस्यायकानि ७० ज्याभ्यःशराश्चो
ममंडलांतं वन्ह्यर्त्तुरवाद्वीक्षणसंमितास्युः शराभितः स्याछशिरामषड्ढरसांगुलाद्येशरयुग्ममन्यत् ७१ व्योमर्त्तुवे
दाग्निरसैः पुनश्च शरद्वयं चोभयतस्तयोस्यात् जीवान्हिकव्यासदलेन वृत्तपादद्वयं चोभयसायकांतम् ७२
महीगुणार्त्तिंदुमितेन वृत्तपादद्वयं मध्यशराग्रतश्च तयोरधस्याग्रयुगं च वृत्तापदाग्रयोनि ऽग्नगयो-
स्क योज्यं ७३ त्यक्तोर्द्धवृत्तांघ्रिभुवं तु मध्यं भवेच्च पद्मे दलमुत्तमं तत् तथैव जत्वाद्धनुषःफलंतछेषंगा-
वेदर्द्धभुवप्रमाणं ७४ पद्मे दलानाम खिलं फलं स्यात् क्षेत्रार्द्धहानिः खिलाथनेन स्वव्यासकोत्सेधक
र्णिकान्हित्यस्कारवनेत्केसरकान्प्रकुर्वन् ७५ एवं दलान्यष्टमितापि चित्वा दलानि दत्त्वार्यय चोत्तमानि ४६

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मत्कृतेनातिमहच्छ्रमेण तुष्यंतु ये क्षेत्रविदो बुधास्ते ७६ दृगद्रिसागरांगुलादिभिर्वोद्धिस्थमंडलं विरच्य मध्यमंडलेन वैकपक्षसंमितैः ७७ विभज्य धन्वनो गुणेर्द्विगष्टमध्यचिन्हगैः वियन्नगाक्षिभिः शरान्लिखेच्च मध्यसूत्रगान् ७८ गुणर्तुषण्णिताश्चते भवंति द्वाद्विगा पुनः लिखेच्च बाणयुग्मयुग्मपिंडुवन्हिषड्वैः ७९ विमुच्य सायकाभितः पृथक्पृथक्समंतरं पुनः शरद्वयं विय छराद्रिसंमितान्तरे ८० विधाय कोटियुग्मगाग्रकर्कटेन पार्श्वयोः द्विवन्हिसंमितेन २३ हृत्तपादयुग्ममत्र ८१ तदूर्ध्वहृत्तपादयुग्ममिंदुरामसायकैः मितेन कर्कटेन मध्यबाणगाग्रतो लिखेत् ८२ मिथो नियुज्य हृत्तपादयुग्ममत्र सर्वतः प्रमाणमतरभुवो दलानि संभवंति हि ८३ पुनः प्रकारांतरेण पद्मकुंडमाह सिद्धांशे वलयेन तस्मिन्नवके वृत्तेनेनसत्कर्णिकांतहृत्तद्विगुणेश्चके सरलवान्मध्योर्ध्वभूमीलिखेत् तद्वृत्तेत्रगुणाभि ३.२.३.२ त्रिगुणचंद्रांशा २.३.३.१ द्विवापंचमतूर्येतेष्टविभागतो धनुर्गुणैर्भक्त्यातथार्तीद्यात्तूर्ध्वे ईशोद्देस्यायाशरांग्रमथ तद्वेधा विभज्यार्द्धतो मत्स्यो मध्यशराच्छिरवीशहारितो भिंचांतचापद्वयं भ्रांत्वा मध्यगुणास्य मूलमभितश्चेखाद्वयार्द्धांजुषावात्नीभ्यांचमिमाय चापयुगलं वातघोदलानां भवेत् ८५ वेदाश्वेब्धियमाशकांतरगुणे प्राक्स्थं च तिर्यस्थितं भूमिंद्वब्धियुगांशकांगुलमुखैः १.१.४.४ संस्पृद्ध सूत्रद्वयं तन्मानात्कृतवेदकोणमभितस्तिर्यग्गुणप्राग्गुणौ बाणाग्न्यब्धियुगे ५.३.४.४ र्लिखेत्तद्गुणैः सूत्रैश्चतुर्भिर्भजेत् ८६ कोणस्थवेदाश्विचतुष्टयंयत्सूत्रैर्विभज्यास्यायथासमंतत् कोणस्थितानि प्रयुग्मानिजत्याद्दृष्टाश्रिकुंडगुणमार्जनास्यात् ८७ अथ प्रकारांतरेणाष्टाश्रिनिजांशगुणस्याष्टमांशमहीणगजांशद्वयेनांकितस्यैवयुक्तं विहायाधऊर्ध्वेगुणप्रांतयोस्तच्चतुष्कोणमध्यांसकर्णेनवृत्तं ८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰त॰ सुदिक्कोणमध्येषु चिन्हाष्टधानं तृतीये तृतीये ततो रज्जुदानं विदिक्स्थसंपातहस्तोरुछमानं विमृज्यान- भ॰ग्रं॰
४७ ष्टसंख्यं भवेत्कोणभानं ८९ करघ्नाक्षीभिरुद्ध्यब्धियुङ्मध्यसूत्रं ततः कोणभूः स्यान्नवोर्वीयुगांशैः समु- १७
द्राब्धिषड्भिर्भवोन्मध्यलंबः समे बाहुकोटिरसाग्न्यर्तुभिस्तः ९० अथ मंडपे ष्टकुंडेषु कस्य का
ग्रकयोनिरिति विवेकः इंद्राग्निवैवस्वतदिक्षु कुंडान्युदङ्मुखान्यंतकयोनिकानि अन्यानि पूर्वापर
वक्त्रयोनीन्याचारकुंडं त्वपिशाकवत्स्यात् ९१ अथ सप्तास्रि क्षेत्रस्य मध्यमगुणे दलितेऽब्धिरामा
वन्ह्यंगुलानदिभिरथाक्षिकराद्रिचंद्रैः संवर्द्धयेच्च वलयं भ्रमयेदनेन तद्व्यासविंशतिलवं विशिखघ्न-
युज्यात् ९२ हत्वाच्चतं नवगुणं भवतीह जीवा तन्याच्च सप्तधनुषो मिलिताग्रकोटीः छित्वाथचापभुवमे-
व बहिश्च शेषं सप्तास्रि कुंडमिह सर्वगुरूपदिष्टं ९३ अथ पंचास्रिकुंडं व्यासार्द्धमर्कांशवि-
भक्तमग्रे संवर्द्धयेद्रामगुणर्तुवेदैः यद्वाग्निरामाक्षिशरांगुलाद्यैर्वृ भ्रामयेद्वृत्तमनेन सम्यक् ९४ त्रि-
भिश्च तद्विस्तृतिपंचमांशैर्मिथो मिलज्याग्रमुखानि पंच धनूंषि जीवाः समषड्शबाणान्यासाद्य तत्स्याद-
थ पंचकोणं ९५ अथ वेदास्रं वेदस्रक्तिसमक्षतो वितनुयात्सूत्रं हि मध्यं स्पृशति द्वित्रिघ्नादि-
षु तस्य तस्य च फलं विद्याच्च तत्तद्गुणं तत्तद्गर्गितमूलसंस्थितमिदं सूत्रं भवेन्मध्यमं तस्मिन् कुंडमितस्स्पृ-
जेत् प्रकृतितो वेदास्रमत्युत्तमं ९६ प्रमाणमिष्टं शशिभागहीनं तिर्यक् च तत्पार्श्वगमेकभागं मत्स्यद्वयेनो-
क्तविधेन साध्यं तस्याग्रपार्श्वस्तरसूत्रमिष्टं ९७ एकहस्तादिक्षेत्रमध्यसूत्राणि सूक्ष्मप्रकारेणाह-
आपंक्तिहस्तोन्मितकुंडदृष्टदेव्यासांगुलान्येककराजिनांशात् २४ स्वराब्धिनेत्रैः सममग्निरामा ३३ . ७ .४७
४ . २ वेदाब्धिबाणैः ४१ . ४ . ४ . ५ क्षितिसागरास्ते ९८ वस्वब्धय ४८ श्चेष्टगुणे स्त्रिबाणा रसाब्धि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाणैर्वसुसायकाश्च वेदेसहैवाग्निरसास्तथाद्वियोमाब्धिभिः ससरसाः कराश्वाः ९९ मुनींदुरामाःशर
वाजिनश्चक्षेत्रांगुलानिक्रमशोंगुलाद्यैः ज्ञेयानितत्त्वैः फलसूक्ष्मसिद्धैतुषंतुयेमघूमभूरिविज्ञाः १००
जिनाखेंदुरामः सुरवाजिबाणाग्निभिश्चैकचत्वारिचाब्धींदुरामैः भुजंगाब्धयोभ्याबरोगेस्त्रिबाणाः
शराग्न्यग्निभिर्नागपंचर्तुरामैः १०१ त्रिषष्टियुगाभ्याब्धिभिः ससषष्टिः स्वरस्तोणिभिः अश्वमभाक्
वेदैः शराश्वामुनीहृत्त्रुभिः संप्रदिशाध्वजायेन पत्त्रनकुंडेषुसंख्या १०२ ध्वजायसिद्धिः करतश्चकेचि
त् तथैवांगुलिभिर्वदंति लंबाहुतात्रविस्तृतिरष्टभक्ताशेषंध्वजाद्याप्रवदंतितज्ज्ञायान् १०३ फलंच
यच्चैककरे सखातंनद्वद्विहस्तादिषुयवदंति तेमेखलाकंठफलंचखातमंगंनजानंतिमथकुमधानात्
१०४ शुल्बेश्रुतौसप्तविधाहृदंति प्रशुच्चयेनैकशतांतदृष्ट्ं स्त्रेत्रंहिमुख्यंनयथेष्टकानांसंख्याविनि
ष्ट्रिर्विहितातथात्र १०५ वेदिःश्रुतौदशदशेतिचवीप्सयोक्ताकल्पेतुसादश १०पदैवचतेनहोमे यव
क्षकोट्ययमलंचततीमयुक्ते भूपालपद्धतिकृतामुनिगीर्विनासा १०६ कुंडोर्ध्वादिसमेखलो चितस
मंविस्तारतुल्यंबुधैः खातंविस्तृतिसंमितोच्चमथवा प्रोक्तंभगादृष्विति सेत्रव्यासजिनांशकेनसमतः
सूर्यांशकेनापिवाकंठंकुंडबाहिर्भवेच्चपरितः स्वस्वाकृतिः सर्वतः १०७ व्यासेभकाजिनांशकेसमतया
कंठाद्वाहि यैस्वलासिस्तैवेदगुणे स्तणं ३·४·३·२ शाविपुलानिध्यर्तुरामोच्छ्रिताः ९·५·३ षट्पं
चाब्धि ६·५·४·३·२ गुणाभिविविखाविपुतानंदा ९ शकोच्चादिमात्तत्पंचाशविहीनकोन्नातिमिता
श्चान्याश्चतस्रोमताः १०८ विस्तारैश्चतुरंश ४ काश्चकथिताश्चोच्चास्तकाकोशकेनागाधिक्रमशोपि
वैकवि १२·९·४ मिताषड्विस्तरोच्चाबुधैः व्यासात्सष्टलवाष्टमांशाविमितंरास्ताद्वयंवाभवेत्सर्वत्रैवमृदेष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काभिरपिवान्यूर्णे नताम्रेणवा १०९ अथयोनिमाह व्यासार्द्धदीर्घाग्निलवायताहिजिनां
शतुंगाग्रनमेखलाच कुंडांतरायांतविलासयोनिर्वृत्तार्द्धयुग्मेनयुतात्समूला ११० विनास्तिदीर्घाङ्कि-
वायवावातिथ्यंशदीर्घाद्राविस्तृतावा स्वदैर्ध्यमानोन्नतिसंमितावाप्यश्वत्थपत्राकृतियोनिरुक्ता १११
अथनाभिमाह नालंमोक्तं योनिमूलेतुकश्चित्स्रोणीमूलाद्व्यमध्यंसुलग्नं वैपुल्येनांभोधिसंख्यां-
गुलंतन्नैवेष्टास्याद्योनिमध्येतुयोनिः ११२ अशक्तौस्वल्पहोमेचकुंडंवास्थंडिलंमृदा वेदांगुष्टोच्चमे-
कंवाचतुरस्रंकरोन्मितं १३ अथवानूतनंपात्रमायसंवापिमृन्मयं नित्येनैमित्तिके काम्येवेदिर्वाकेश्चि-
दीरिता १४ ध्वजायसिद्धिःकरतश्चकेचित्केचित्तपैवांगुलिभिर्वदंति लंबाहताविस्तृतिरष्टभक्ताशेषं-
ध्वजाद्यान्यवदंतिचायान् १५ सिद्धा २४ ध्वैकगजाब्धि ४८ संख्यलवयुक्वेदास्तथास्यब्धिभिर्नंद्यास्यं
शयुताश्चद्जलयात्यर्को शकैःसप्तभिः नागानोनिधयश्चपएनवतिमश्चंद्रांशयुक्ता हितास्पृक्षाःपंचयवा
श्चपंचमलवद्वाभ्यांयुतापंचमे १६ षष्टेनागशरायुतैः ५८·४·५ शरयवैरूयंगानिवेदाश्तायुक्ताश्वे
ककुअंशकेनमुनिषट् ५७·७ सप्तास्तताःश्रोणिना वस्वंशेनतथाक्षिसप्तयुगमन्वंशेनयुक्तेंदुनापंच
द्वाङ्घ्रियवाःशरांशविधुनाभाव्याध्वजायक्रमात् १७ सिद्धा २४ सुरासप्तदशांशयुक्ताधृत्याविभक्ताः श-
शिसागराश्च वेदैस्वरैर्नागयुगाःसरवाभ्यांगुणेषुवेश्वांगयुगांकभक्ताः १८ गजेषवाधस्त्रयुतानवेक-
भक्तास्त्रिषष्टिः कृतिभिर्गजश्चसप्तर्त्तवस्वाष्टभिरेकभक्ताःयुग्माद्ययोभ्याभमिनास्तथैव १९ मूतर्ष-
योनंदयुताश्चपंक्तिर्विभाजितास्तेत्रफलमवादाः सिद्धादयःपंक्तिकरांतकुंडेष्वकोदितोमध्यगुणा- ४८
भवन्ति १२० सुखस्मृतिर्गणितमागमवास्तुकविधां छदःसुपर्णचितिकाव्यपुराणवेदान् विंदंतिवा-

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ष्मातिदृशः कतिचित् समस्तांविद्वानहंकथमतः स्वमतिंविमृश्य १२१ स्मृत्वामधूत्तमपदांबुजमिष्ट-
सिद्ध्यै दृष्ट्वातुपूर्वविदुषांकृतिमादरेण ज्ञात्वातदर्थमतिसूक्ष्मविचारणेनयच्चोक्तमत्रविबुधाः सुरवयं
तुतेन २२ अथविनायकशांतेराह वेदेपंक्तिपदायतांसमभुजांमित्वोन्नसूर्वेयोर्वेद्याषोडश-
कांगुलांतरमितेपीठंद्विहस्तायतं खेटानांरचयेत्करार्द्धमितमुन्नत्याचकुंडांशतस्त्यक्त्वात्रिंशदृश्यांगु-
लानिनवदिश्यादर्शमध्योन्नतं २३ भद्रंतद्वदथांगुलादिधृतिचंद्रर्तुक्रमादंतरंहित्वाचोत्तरतःकला
शांविवरंकुंडान्तथेद्वाक्षिभिः चंद्रत्वंशयुतैस्तथापरदिशःसप्तेंदुभिःसप्तचंद्राब्ध्यंशैरपितत्सुराद्रियुग
युग्मांशायतविस्तृतं२४ हेरंभान्वगृहंगृहाङ्कुणयमैश्चंद्रर्तुयुक्तांशकैः २३·१·६ याम्येहस्तमितंततोव्धि

१	२	३	४	५	६	७	८	९	१०
२४	३३	४१	४८	५३	५८	६३	६२	७२	७५
१	२२	७	१	२	४	१	१	१	१
४८	२२	१२	२६	५	५	१६	८	१४४	५

पवंदशाह	१	२	३	४	५	६	७	८	९	१०	·
स्ते ध्वजाया	२४	३३	४१	४८	५३	५८	६३	६७	७२	७५	
आनेपाअंशः	०	१७	४	०	६	१५	४	८	०	१	अं
भाजकाः	०	१८	७	०	१	११	८	४	०	१०	भा

यमलैःषड्पंचषड्भिर्युते वेद्याश्वांतरमत्रचंद्रदिशितांद्विशांगुलैःरभ्वषट्चंद्रांशैश्चरसाश्विभिक्षितियन्-
मांक्षांशैश्चकुंडान्तरे १२५ कुंडंपश्चिमयाम्यवेदिपरिधेर्विंशद्भिः रवर्तुसप्ताक्षांशैश्चनरवर्तुसाग्निकरसे-
श्वांशांतरेवस्थितं नागाश्वांगुलमध्यसूत्रमथवातद्वत्स्मृतंस्थंडिलं साध्यंविश्वहषड्भिःरव्यातःप्रशांतिकरणे-
शांत्यैग्रहाणामपि २६ इतिसग्रहविनायकशांतिविधेर्भेद्पीठकुंडानांमानमुक्तं अथ-
ग्रहाणांमंडलप्रमाणं पीठंयुग्मकरमितायविलिखेत्पद्मंदलश्चाष्टभिर्युक्तंमध्यमवर्णिकांतुकुहरे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौरं सुवृत्तं गृहं चंद्राश्वर्तुमितांगुलादिभिरिह व्यासार्द्धयुक्त्याहितवेदाष्ट्यक्षिमितैस्तथाग्निकद-
लेसौम्यं चतुःकोटिकं १२७ भौमं याम्यदलेक्षिवाणामितविष्कुंभांतरे भूतलेवन्हाप्त्याष्टिभिरंगुला-
दिरचितं तावन्मिते स्वद्वयं एवं त्र्यस्रिगृहं हि मायमभवदिग्ध्वंशविष्कुंभयुग्भूमूलादंगुलमध्यसूत्रमनु
परिस्रंशं च तिर्यग्द्वयं २८ मध्यस्थैकभुवं त्रिकोणयुगलं पूर्वापरायां लिखेन्मूले हस्तयुतं शरांघ्रिति-
गृहं चंद्रात्मजस्योत्तमं सौम्ये पद्येदलेगुरोस्तदहनेरायामसूत्रं भवेद्विस्तारेंगुलयुग्ममत्र कथि-
तं दीर्घं चतुःस्रक्तिकं २९ ऐंद्र्यां भार्गवपंजरं सुविपुलं त्र्यंशैश्च पार्श्वद्वये भित्तिर्द्व्यंगुलमुच्छितं तदुपरिभा-
त्या त्रिकोणं भवेत् वेदांशांतरसूत्रमत्ररचितं पंचास्रमत्युत्तमं वारुण्यां धनुषं शनैःकुमुनिषड्व्या-
सार्द्धवृत्तार्द्धकं ३० स्वर्भानोः शरनेत्ररामयमयुक् पूर्यास्य लक्ष्ये ऌवैर्विष्कुंभं युगदृग्गुणाक्षितिरधः
साध्या सुरेभूःसमाः केतुनांघ्वजमूलभूर्गुणयुगात्वव्ध्यंशमानानिले पंचांशैर्मितमध्यसूत्रमुदितं भू-
लेसुदंडांकितं ३१ एवं भानुजिनाब्धिवेदरसनिध्यंगैर्जिनांकांगुलाद्यंशैः सद्गुणितेन हर्म्ये स्वनं सूर्यादि-
खेटक्रमात् शौलीं वृत्तिषु मार्श्रितेन बलभद्रेहनसम्यक्कृशुभानग्रंथान्त्द्दयवधाय पूर्णमुदितमेधाविन-
संतुष्टये ३२ अथाग्निहोत्रदर्शपूर्णमासादिषु प्राकृतं वेदिनिर्माणमाह भ्रांशीमविभ्रांशं-
वर्तीपरिक्ष्य संशोध्य भूमिं सुसमां सम्यक् च तां प्रगृह्य तस्यामुनिलिप्य शालां कृत्वा निहन्यादृढमाद्यशंकुं ३३
प्राचीं ततः पूर्ववदुक्तयुक्त्या संसाध्य देशे परितः प्रशस्ते नरैस्स्वविश्वाब्धिगुणांगुलादिव्यासार्द्धमित्यावि-
लिखेत्सुवृत्ते ३४ तन्मध्यचिन्हाद्दसुविक्रमेषु वेकादशद्वादशसुस्वमत्या वाशांस्यमध्यं परिकल्प्य ४९
कुर्यात्कुंडं चतुःकोणमरत्निमात्रं ३५ मध्यं च नर्याहवनीययोस्तं विभज्य षोढा प्रथमं सतधा च लब्धां

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

युतोक्षप्रभयायुतोसौसौम्येथसौम्येंतरितः स्फुटः स्यात् भाग्रात्मदेयोवलयेज्यकावत् स्फुटे
भवेतांकिलयाम्यसौम्ये १७ भुजार्द्धकेंद्रोपरिसूत्रदानात् प्राचीहिसिद्धांतमतेनतुल्या त-
थैवदिक्साधनमत्रचिंत्यंनवांगुले मंडलकेपितावत् १८ अथसायनांशंरवेरशाधोहारा-
गुण्यास्तदधोहाराः हारत्द तरवेःकलाभिर्युतोगुण्यपलकर्णगुणोद्विघ्नाक्षभासंस्कृतः स्पष्टः
षोडशांगुल वृत्ते भुजसाधनं नवांगुलवृत्तेवा अथमध्यान्हछाययाप्राचीसाधनं दिनार्द्ध
प्रभामंडलस्याष्टभाग्राद्गुणोनीयते यश्चकेंद्रोपरिष्टात् स्फुटः सौम्यसौम्योक्षभाल्पाक्षभाती
न्योर्यदास्याद्भालत्रयुन्त्यंतरेण १९ अथसमचतुरस्रसाधनं दिक्सूत्रसंपातमु
खाधिमत्स्यान्दिक्चिन्हकेभ्योत्रविदिक्स्थपुच्छन् विलिख्य तुल्यश्रवणांयुगस्रंपुच्छाग्रयुग्
वेदगुणैःसमंस्यात् २० अथोत्तमादिमंडपाः जिन२४ नख२० धृति१८ भूपा१६.
स्तनय स्युःप्रशस्तान्नृपमनुरविहस्तामध्यमास्तेभवंति रविदशवसुहस्तास्तेधमामंडपाःस्यु
समभुजचतुरस्राःसाधनीयामहार्हैः २१ करज२० करमितोवामंडपोब्राह्मणानांनृपरविक
रतुल्योभूपतीनांविशांच रविदशकरतुल्यस्तंघ्रिजानांव्यवस्थाकरिकरमितउच्चैःप्राकृतानां
तुकेचित् २२ होमानुमानात्किलकुंडमेके स्यान्मंडपोवाष्टगुणस्तुकुंडात् नामानिवक्ष्येनव
मंडपानांहीनात्क्रमात्तत्कृतमस्तकयावत् २३ योनागैर्जयसंज्ञकश्चविजयादिग्भिस्त्रिनेत्रै-
र्भद्रकः शक्रैरेषसुभद्रकोनृपकरैश्चानंदकोष्टेंदुभिः यागार्थेखलुविश्वरूपकइतिप्रोक्तो
नखैश्चध्रुवोह्यविंशैश्चसुभद्रकोजिनमितैःस्यात्सुप्रसंन्नःकरैः २४ अपीमंडपाःस्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंबोधायनोक्ताघनाद्याःपरेचार्कहस्तादिकाये करद्वंद्वहृध्याजगुश्चाथकामांकुशे ःपाणिभि
र्मंडपःस्यात्तुलायां २५ कैश्चिन्मंडपईरितः करभवे २० हस्तैस्तकलारोहणेहस्तैश्चाकृतिभिः
२२ समःशुभकलोब्रम्हांड दानेपरैः मुक्त्वाहर्म्यसमांतरालमुदगैःद्व्यंबागृहमंडपश्चैवहि द्वयादि
पूर्वतुल्यविवरंत्यक्त्वापरोमंडपः २६ विधायक्षितिमंडपस्यांककोष्टांविरच्यांतकोष्टेतुवेदीष्ट
काभिः स्वकीयाग्निवेदेषुतांकरुद्रांशकेवाथकल्पात्रहस्तोन्नतासा २७ स्तंभाःस्युर्मखसा
रदारुरचितावावंशजाः पूगजानिश्छिद्राऋजवोदृढाश्चगदितास्ताभेतुशालादिजाः स्वी
कार्याःकुटिलाःशुष्कतरुजाश्चासौम्यपृथ्वीमयाःशीर्णास्तेगृहशल्यजाश्चविबुधैस्त्याज्याः
वृत्तौसर्वदा २८ स्तंभाश्चोत्तममंडपार्द्वविमिताश्चूडान्वितावेदिकाकोणेष्वबुधयोष्टहस्तकि
मितास्तेस्युर्हिमध्यात्पयोः बाह्याःपंचकरोन्नताःविमिताः स्युर्वह्निकोणात्क्रमात्पंचांशेन्न
तुये द्विहस्तविमितारोप्याभुविस्वेच्छया २९ बाह्यस्तंभशिखास्तुचारुवलिकास्तयोन्नि
तायोजयेन्मध्येवेदमितास्तयादिशिदिशिद्वेद्वेतुतिर्यंडन्न्यसेत् कोणेष्वद्विमितास्तथाथाशि
खराकाराच्चतस्त्रोंतराथोद्वाराणिदिगंतराणिकरयुग्मेनैवहीनेरुजेत् ३० वेदैर्गजैरंगुलिभि
स्तद्व्याद्वाराणिमध्योत्तमयोः क्रमेण सौदुंबराण्यत्रकरंविहायास्थितिंजगुर्ज्ञाःकिलतोरणा
नां ३१ प्लक्षोदुंबरत्वोलपन्नवटजावाद्यात्ययोर्व्यत्ययेनाद्योपात्यविपर्ययेणगदिताः शाखाः
क्रमात्पूर्वतः चंद्राग्न्यंगुलवर्त्तुलाश्वसरलास्तुंगाःकरैःपंचभिःषड्भिःसप्तमितैःक्रमेणावि
बुधैर्हीनादिकेमंडपे ३२ निश्छिद्राःसरलासमास्त्वविहिताताभेसवृद्धारुजाः शाखावाशामिजं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सान्मिथुनके लग्नेभिजित्के मुहूर्ते सत्कुंडविचारणार्थसुदिनोदीपः प्रकाशंगयात् ५७ श्रीमत्तं
भसुतीर्थयत्तनमहेध्यंभोधियोगेवसन्नानाशास्त्रविचारणे पटुमतिः श्रीगौड रत्नाकरात् जातोव
त्सकुलाब्धिशीतकिरणाः सत्कुंडतत्वंस्फुटंशुक्रः स्थावरसूनुरत्रबलभद्राख्यः प्रवक्तिस्फुटं ५८-
यः पूर्वसुहिरण्यगर्भमतुलंरूपंदधन्वान्विरण्मध्येभट्टसमाख्ययाभवदसौवेदान्वितत्वंस्वराट् भू
यः श्रीजयदेवदीक्षितमणिः सम्राट्सुविस्तारितुसांगंकर्मपथंचरान्विजयतेश्रीमन्नृसिंहात्मभूः ५९-
येनश्रीभगवान् मखैर्बहुविधैः संतर्पितः शास्त्रतोयेनद्वादशसौत्यकाग्निचयनैः सद्वाजपेयादिभिः इ
ष्टंतेनसुशास्त्रवेदविदुषांतत्वोपदेशायचाज्ञसेनायमगाधसागरजलापूर्णेंदुवत्काशितः १६० छ १
॥ इतिश्रीबलभद्रशुक्लविरचितः कुंडतत्वप्रदीपसमासः ॥ शुभंभवतु ॥

श्रीगणेशायनमः श्रीवेदमातागायत्र्यैनमः श्रीकुलदेवतायेनमः ॐमित्यक्षरमद्वितीयम
नदन्तसेयदंतः स्थितंनरवासोतिविभर्ति विश्वमखिलंयस्मिन्पुनर्लीयते दृष्ट्वाचार्यकृतागमाच्छमह-
रः श्रीमाधवेनोद्धतोनिर्मथ्यांकसमुद्रमिष्टफलदः श्रीकुंडकल्पद्रुमः १ सम्यतेनरिवामप दोर्छितेस
मकृतोर्ध्वभुजेकृतवेणुना परिमितेसतियोस्त्लवः करःकरजिनांशकमंगुलमीरित २ मानप्रोक्तंवे
दमूलंमयात्रकल्पे प्रोक्तंयच्चकात्यायनेन श्रौतेग्रात्घंनागमोक्तेषुतत्स्यादेवंब्रूतेविश्वनाथोव्यवस्
स्था ३ मुख्यांगुष्टंयोंशएवात्रमुष्टेर्वेदैः प्रोक्तंतच्चमुष्ट्यंगुलंहि कुंडहोमागानितेनैवकार्याण्याहुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं.क.
५१

पूर्वे देह लब्धांगुलैर्वा ४ यन्मध्यमामध्यमपर्वदैर्घ्यं मानं तु मात्रांगुलमुक्तमेतत् स्वपादहीनं स्व शुभ
तु मध्यसंज्ञं पर्वार्द्धमानं त्वधमं स्मृतज्ञैः ५ यवो यूका च माल्लीक्षा वालाग्र रथरेणुकः त्रसरेणु
श्च संज्ञाः स्युरंगुष्टादष्टमाशकाः ६ कृतमुष्टिः प्रकोष्टः स्यामुष्टिररत्निर्निरष्टमः करएव कलांशा
नःसोरत्निस्त्वकनिष्ठिकः ७ शिवालये पुण्यसरित्तटे वा गोष्टेषु दक्षाक्ष्मवणे निर्जनगने यद्वोचि
ते शोधितलं नते कृते हस्तेन वार्द्धेन समे च मंडपः ८ पाटीरागरुरक्तचंदनरदन्यग्रोधवैकंकतश्री
पर्णीचलपर्णबिल्वखदिरब्रह्मद्रुमोदुंबराः एषां शंकुरकल्मषः च सरलस्तुंगः प्रतंगांगुल :पर्वी
द्वद्वतलः कुशाग्रउदितोयं त्र च्चमेवर्तुलः ९ प्राचीसाधनं यद्वानिरवयोतु विमुद्धरेणाकें
द्रे च वृत्तस्यनवांगुलस्य तिथ्यंगुलैर्दिक्षु चतुर्षु संस्थैः कीलैः शिरः स्पृक् सरलत्वमेति अभी-
ष्टमासंमितकर्कटेन विधाय वृत्तं त्वपरं नरस्य तलस्य विस्तारदलेन तच्चाचलं स्थले शंकुनिवेश-
योग्यं ११ छतिप्रवेशापगमौ विदित्वा शंकू निरवेयौ परपूर्वसंज्ञौ ताभ्यां तिमेस्तः खलुयाम्यसौ
म्ये दिक्साधनं स्थूलमतिप्रयुक्तं १२ सूक्ष्मप्राचीसाधनं छतिप्रवेशोत्क्रुवनाडि-
काभिर्द्विघ्नभिरूनैर्नदिनेन निघ्नाः द्विनद्वयस्यापगमांतरालभागात्हृताः स्युःखरसैरभीष्टाः
१३ तैश्चालयेदें द्विगुणं तु भावाद्वामोदितोयं विधिरत्र सूक्ष्मः वक्ष्येथ सूक्ष्मं किल तत्क्षणे नदि-
क्साधनं कष्टतरं सुबुध्ध्या १४ विधाय भूपांगुलिभिः च वृत्तं स्याप्योतराशंकुरसौ स्ववृत्ते प्र
त्रैववृत्ते विशतिप्रभाग्रं तत्रां काथिज्ञा घटिकानुमेया १५ तत्कालार्कः सायनांशो विधेयस्तदो-
गाद्स्थगुण्यायुतश्च शेषाद्वाराश्याक्षकर्णेन निघ्नो दोर्मध्यं स्यात्सायनांशार्कगोले १६ द्विघ्ना

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

शकाग्रंतु समंनिधात अंशंचहित्वापरदक्षिणेग्निः ३६ अग्नेरुदक्सार्द्धनवांगुलेस्मिन्युकेषुभिर्विर्द्धितभू
स्तशंकौ एकोनविंशांगुलिभिर्यवैक यूकाद्वयव्यासदलेनवृत्त ३७ विलिख्यपूर्वापरसंस्थजीवांकृत्वाचहित्वो
त्तरकार्मुकंहि याम्यांभवेत्कुंडसमर्थयज्ञंसभ्यंसभायांचतुरस्रमुक्तं ३८ ऊपासनंचैवमथोगृहांतः कुंडं
द्वयंवर्यमिवोक्तवद्वा उपर्युपर्यर्थितमेखलाभिस्त्रिभिस्त्रिभिः सर्वस्वरेषुभित्ति ३९ एवंकुंडानांसाधनंप्रमा
णंचोक्तंवेदिसाधनमाह वेदांगुलोन्वाभिरथोविदध्यान्ध्रुवश्चतारस्मगुलविरूढताभि रज्जुंद्विपाशांषडर-
त्निदीर्घांविचिन्हितांपञ्चसुमध्यभागे १४० हस्तद्वयेप्यंगुलषद्कचिन्हे त्वष्टादशेष्वत्रिंशुलसितांच मा
र्गीभवादाहवनीयशंकोः पश्चादरत्न्यांप्रतिमुंच्यशंकु ४१ पाशद्वयंसप्रतिमुच्यशंकौविकर्षयेदंगुलष
ट्कचिन्हं पाश्चात्यहस्तद्वयरज्जुचिन्हेशंकुंचयाम्योत्तरगौनिखेयौ ४२ तच्छ्रोणियुग्मंत्वथपूर्वपाशादष्टा-
दशांकेनविकृष्यरज्जुमग्नीशयोरंसयुगंतयास्याछंकुद्वयासार्द्धकरेस्वचिन्हे ४३ सूत्रार्पणात्कोणचतु
ष्टयेषुस्तेत्रभवेतद्विषमंहिवेद्याः पूर्वार्द्ध चापरार्द्धयावच्चकोणोपरिवेष्टयरज्वा ४४ अग्निहृतांतां
मनुवेष्टयशंकूयाम्योत्तरौमध्यगतौविखेयौ तुरीयभागेनदलीकृतायारज्जोः पृथक्त्वादथवापिशंकोः ४५
वृत्तार्द्धमानेनचसंग्रहांतुकृत्वाखनेअंगुलवेदिमध्यं वितानपूर्वापरिसौम्यदिक्षुद्वारैर्युतंशास्यपरस्पु-
रस्तात् ४६ याम्यैंद्रदिग्द्वारसहद्वयोश्चवश्चाग्रचभस्मोद्धरणाच्चकुर्यात् एवंहविर्यज्ञविधौवितानकुं
डानिसाध्यानिसमानिसद्भिः ४७ वृत्तेपूर्वंविनिर्मितेत्रियववक्रूषर्द्धैः शराश्चांगुलैर्मित्वात्रषट्भिरंगुलै
श्चतस्रभिर्ज्याभिर्बीजेन्मंडलं द्वाभ्यामध्यशराद्वयंयवयुतद्वाभ्यांचबाणाद्वयंमित्वापूर्ववदष्टपत्रवि
धिनापद्मंचतुर्भिर्दलैः ४८ अथग्रंथालंकारः स्वस्तिश्रीशुभमस्तुजगतःश्रीमत्स्वतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संमितं पुंसो निर्वचनीयमित्यगुणिनो वेदस्वरूपस्य च श्रीमत्स्वस्ति समस्तविश्वजगदुत्पत्तिस्थाविस-
र्गादेः कर्त्तुरचिंत्यशक्तिमहिमायोगात्परिभ्राम्यतः ४९ ब्रह्मांडैककटाहवर्त्तिभगवन्नाभिप्रभूता-
खिलस्रष्टुर्लोकपितामहस्य बहुधायाच्यावशात्कुर्वतः रूपाण्यन्यतमानि मत्स्यकमठादीनि प्रपंचेऽ-
म्भोरानंदैकघनस्य विष्णुर्भगवतोस्वेच्छाय मुज्जृंभिते ५० सुव्यक्तावरणैरहंकृतिमुखैक्षित्यादिपंचाप्तते-
स्मिन्ब्रह्मांडकरंडमध्यनिहिताधारादिशक्त्यन्विते कूर्मानंतवराहकाष्टमितादिग्दंतिप्रतिष्ठेमहापाता-
लादिसुसप्तकोपरितने भूरादधोवस्थिते ५१ शेषःश्रीफणिराट्सहस्रफणिनःकालायमानस्य सन्मू-
र्ध्निस्थेषु परिपर्वतार्णववनद्वीपर्षिसप्ताहृते गुप्तैश्चैवचतुर्दशांतररचिते निध्यूस्वरे खंडारण्ये नवभि-
स्त्रिभिर्हुतवहयामैश्च सन्मंडिते ५२ गंगासिंधुसरस्वतीप्रभृतिभिः क्षेत्रैश्च कुर्वादिभिर्द्वीपैः पूर्वमु-
खाभिरेवमभितोजुष्टे प्रदेशालिह पंचाशन्मितकोटिभिश्च गणितेविस्तारितेयोजनैर्जंबूद्वीपनिकेतने-
कभरतेखंडे पृथिव्यामिह ५३ वर्षेभारतसंज्ञकेद्य भगवल्लीलोर्मिसत्सागरेमध्यावस्थःभुजंगभोगशय-
नंकर्त्तुश्चनाभ्यंबुजात् उत्पन्नस्य जगत्प्रजाःसुसृजतःश्रीब्रह्मणःस्वेपरार्द्धेसद्वर्ववराहवल्लगणितोत्पन्ने
द्वितीयेतथा ५४ कल्पेश्वेतवराहनाम्निविहितेवैवस्वतेसप्तमे सन्मन्वंतरकेष्टविंशतितमे मासैकलौसंप्रति
अन्हिस्वेप्रथमेऽखिलक्षितिपतिःश्रीविक्रमार्कप्रभोर्वर्षाशीतिसहैवषोडशशतातीतेचकालेत्विह ५५
श्रीमद्भूपतिशालिवाहनशकात्पंचाब्धितिथ्यन्विते श्रीसूर्येरिशिसौम्यगामिनिवसंतर्त्तौचमीनेरवौ चै-
त्रेशुक्लगपौर्णमासिहिमगौसावित्र्यधिष्ठेध्रुतौकन्यस्थेहिमगावथावनिसुतेमेषेबुधेमीनगे ५६ सिंहे
देवगुरौसितेमकरगेकर्केशनौसंस्थिते कन्यायांतमसिप्रकेतुषुरुषंसंस्थेषुपुण्येहनि सुविष्याकरणेच

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुताल खदिराणां मध्यतस्त्वेकजाः द्वारस्योन्नतः स्थले निजनिजे रोप्याः स्वपंचांशके स्तम्भौ लौ-
फलकंकरद्वयमितं द्वारासमं हीनके ३३ षड्भिर्द्वादशपर्वभिस्तदधिकं मध्योत्तमे मंडपे वा दैर्घ्यौ
द्वौ मितानि रंध्रसहितान्यंतर्द्वये स्युस्तथा तन्मौलौ फललार्क भागविमिताः कश्चिच्छारवांगुलसंमिता
श्चक्रवारिगदाब्जैरंकिता वैष्णवे ३४ शैवे त्रिशूलोपमा सेनिजानिजतरुजाः पर्वभिः प्रोन्नताः स्युर्न-
दैरुद्रैश्चिन्हैर्निजनिजनिगमेनाल्पतः स्थूलमूलाः वेशस्तेषां क्रमेणैव बिलविहितो द्वित्रिवेदांगुलै
र्मन्मध्ये मूलं समस्यात्तदितरयुगलं पार्श्वसंस्थं तु चक्रं ३५ एवं त्रीणि त्रिशूलान्यपि प्रतिफलकं प्रांत
युग्मेत्वमध्ये चैकं हस्तमात्रं निगमलववततं स्वाष्टमांशेन रोप्य हित्वा द्वाराणि सद्भिर्हरितदलचयै
र्नारिकेलादिकानां चाद्रैर्वंशैः कटैर्वा बहुस्रुवजनकश्छादितो मंडपः स्यात् ३६ स्तद्दमरुणमै
द्र्यां याम्यदिश्यंजनाभं विकटमपि सुभ्रमं श्वेतवर्णं प्रतीच्यां धनददिशि सुपीतं सुप्रभं तत्र शुभं-
न घृतकलशयुगाष्टयं सांकुरं सिद्धिदं स्यात् ३७ मांजिष्ठादिभिरंजिते सुवसनैः सत्सदकूलैः फ
लैर्घंटाचामरपुष्पपल्लवकुशस्त्राग्भिर्विचित्रैर्घटैः सद्दृश्यैर्घृतपालिकैश्च मुकुरैः स्वाद्यैर्वितानैस्त-
थारत्नैः किंकिणिकादिभूषणवरैः सन्मंडपं भूषयेत् ३८ विवाहे स्मृता ब्राह्मी धरी वेदिकासानरवा-
स्नानृपस्याभिषेके सुभद्रा सभद्रा तथारामवाप्यादिकृत्ये स्मृता पथिनोपप्रवृत्ते केवलेव ३९ अथ ध्व-
जपताकामाह पुच्छं त्र्यस्त्रित्रिहस्तं तदुपरिचसमं हस्तमात्रं युगास्त्रमूर्ध्वे वैसारिणाभं भवति
करमितं मूलभागे द्विहस्तं एवं पंचायतादि कृपतिस शरुच्चश्चिन्हितावाहनैः स्वैर्द्वा पैर्वास्युर्ध्वजा
स्ते दशकरविमिते पूच्च वंशेषु बद्धाः ४० स्यादेकोतीवतुंगः शिखरमधिगतो दिक्करास्त्रिस्तनश्च-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुं॰ क॰ नानावर्णैर्विचित्रोद्भुतसितवृषभेनांकितोयंवरिष्टः आशेशाभाद्विहस्ताः स्वनगलवततावांगु-
५२ लैः पूर्णहृग्भिः श्वेताब्राह्मी पताकाभवतिनिजनिजेरायुधैरंकितास्ताः ४१ अथदिगीशवाहनायुधवर्णानाह दुम १६
स्यादिंद्रः करिवाहनः कुलिशभृत्प्राच्यांपिशंगद्युतिस्त्वाग्नेयामजवाहनो
ग्निजरुचिः शक्त्यायुतोहव्य वाट् याम्यांदंडकरोयमश्चमहिषारूढोंजनाभस्तथानैर्ऋत्यांक
रेवालभृन्निर्ऋतिजः सिंहाधिरूढोसितः ४२ वारुण्यांझषगोहिमद्युतिरपांनाथश्चपाशान्वि
तोवायव्यांमृगवाहनोंकुशक रोवायुः शुकाभः स्मृतः कौबेर्य्यांनरवाहनोदिशिगदापाणिर्वि-
चित्रस्तथारौद्र्यांसद्वृषवाहनः शशिनिभः स्याच्छूलभृच्छकरः ४३ हंसस्थोरुणकः कमं
डलुकरः शक्रेशयोरंतरानंतोपापति रक्षसोर्घनिभस्ताक्ष्याधिरूढोरिभृत शस्त्राण्यंकय
वाहनानिचपटोस्वर्णादिधातुद्रवैर्यद्वाचंदनकुंकुमादिकरसैर्वावस्त्रखंडैः शुभैः ४४ शता
र्द्धहोमेचशताद्दशघ्नेत्वाकोटिककुंडमितिक्रमेण रत्न्यात्तरत्न्याक्षितिबाहुवेदतकोष्टहस्तैर्ग
दितामहर्द्भिः लक्षेचहस्तंप्रतिलक्षवृद्ध्याहस्तस्यवृद्धिः प्रयुतावधिः स्यात् कोटोभवेदद्धि
तमष्टिहस्तनन्नारिकेलादिहुतौतुकुंडं ४५ लक्षार्द्धहोमेत्रिकरंतुलक्ष्येहस्तांधिकंपंच-
करंदशघ्ने लक्षेतुरामाकुश २ समितेषड्ढस्तंतथाकोटिदलेद्विहस्त ४० केचिच्छतार्द्धेचश
तेशतघ्नेबाणेसहस्रेंगुलिभिः क्रमेण नागेपतंगैर्नृपसंमितैश्चनखैर्हिकुंडानिसमीरितानि
४८ तथायुताद्द्विगुणितेर्बुदांतेभूबाहुवेदांगगजैः प्रदिष्टं उक्तप्रमाणादधिकोनहोमेत्रैराशिके
नात्रफलप्रकल्प्य ४९ खातेधिकेरोगउदीरितश्चहीनेक्षयोधेनुधनस्यकर्तुः मानेधिकेस्या ५३

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मृतिरल्पकेच दैन्यंविनाशस्त्वगलेसुतानां ५० वक्रेज्वरोतीवविहीनवप्रेशोकोधिकोचित्त
विनाशनंस्यात् अयोनिकेस्त्रीमरणंचकुंडे विनाभिकेबंधुजनक्षयश्च ५१ स्याच्छिन्नवप्रेम
रणंतथैवादिङ्मूढके स्वीयकुलस्यनाशः यथोक्तकुंडेनविनाप्रसत्यहोमोविधेयोनबुधैःकदा
पि ५२ स्तंभेशांतौनवसिद्धौयशासियुगभुजोभक्तवृत्यैपिचैथाभोगेचाकर्षणेस्यात्तनयकरम
थोवन्हिकोणेभगाभं शांतौमृत्यौशुभेस्याद्दलितशशिनिभं दक्षिणेथत्रिकोणनैर्ऋत्यांवैरिह
त्येजलदिशिवलयपुष्टिसंपच्चशांति षट्कोणंवायुकोणेमृतिशमनरिपूच्चाटयोरुक्तमाद्ये
र्नानासिद्धिप्रदं तद्दिशिदिशिस्फभगंनीरजाभंरुतीद्रैः आरोग्ययोगसिद्धौशिवदिशिचत
थासौख्यकार्येष्टकोणं शाक्रीशान्योस्कमध्येवलयमपियुगास्त्रंहिसंपत्प्रदंस्यात् ५४ अ
त्यंतमुख्योनवकुंडपक्षश्चेदत्रदक्षोनतदाखिलानि छंत्वानिवावेदभुजानितानितथैवमध्या
स्त्विषुकुंडपक्षः ५५ स्युर्न्मध्यमेदिक्षुयुगोन्मितानिकुंडानिपूर्वकथितानियानि यत्पंचमं
त्वीशदलेविधेयंवेदास्त्रकंवावलयंस्रुधीभिः ५६ यत्पंचमंशक्रशिवांतरालेरामेणतन्नो
बहुसंमतःस्यात् कनिष्ठपक्षेसकृदुत्तरस्यांरौद्र्यामपीद्र्यामथवाप्रतीच्यां ५७ यैरंतरा
कुंडमुदीरितंस्याद्वेदीनुरोद्र्यायजनस्यहेतोः तद्धोममुख्येविहितंप्रवीणैर्दानादिकृत्येन
लत्रिकोणान्यध्यस्त्रिसर्वेष्वपिवाविधेयं ५९ स्त्रीणांकचिद्योनिनिभान्यथातः समंततोवे
रियुगांशमु झनस्युर्मेखलाकंडवशात्यदंवाविप्रांगुलानीत्यपिवेदिभिन्नैः ६० अथोय

थास्युर्बहुसंमितानिकुंडानिदोषैरिह वर्जितानिकुंडानिदोषैरिरुक्तरवा निकर्त्तुंवाक्यानिवस्ये द्रुम
तुमनोहराणि ६१ अभीष्टमानस्यपदंहि सूक्ष्मं स्पष्टोभुजोसौन्चतुरस्त्रकेस्यात् सएवहस्तःप
रिकल्पनीयः सांगेषुकुंडेषुविजांगुलाद्यैः मानेनतेनैवयथोक्तरीत्यासमश्चवस्कल्यचतुर्भुजमा
क् सम्यग्विधायाथभगादिकानांकर्त्तव्यतावच्मिपरिस्फुटांच ६२ संवर्ध्यपंचेंदुभुजांगुला
द्यैरग्रंचमूलेब्धिलवस्यमध्यात् दिक्चिन्हयुग्भ्यांवलयार्द्धकाभ्यामग्राङ्कुजाभ्यांचलपत्रकाभं
६४ शक्राब्धिवेदांगयुगांगुलाद्यैरंध्रंपुरान्यस्यनयेत्त्रिकोणं षडंगुलव्यासदलेनमूलेवृत्तार्द्धयु
ग्मेनभगोपमंवा ६५ नंदाब्धिवेदांगयुगांगुलाद्यैर्वर्ध्येंदुदक्चिन्हितमध्यसूत्रात् द्विघ्नैर्यमा
शाधनुरेवतस्कज्यकोत्तरखंडस्कघांशुखंड ६६ एकाधिविंशांश१ वरवह्निबाणैःपर्वादिभिर्व्या
सदलेस्कदत्ते षड्विंशरामागभुजैस्त्रिसूत्रैः शक्राग्रकव्यास्त्रिविवृत्तमुक्तं ६७ विश्वाब्धिलोच
नप्राणैरंगुलाद्यैर्मितस्यच कर्कटस्यभ्रमाद्वृत्तकुंडंवरुणादिग्गतं ६८ शचिशशैलांबरशैल
वेदव्यासार्द्धवृत्तेपिचतेनतुल्यैः षड्भिर्भुजारुत्तरतःषडस्त्रंकुंडंभवेद्वृत्तविमार्जनेन ६९ धृतींदु
शैलाग्निभिरंगुलाद्यैर्व्यासार्द्धवृत्तेयम सौम्यादिग्भ्यां भुजैस्कसाग्निर्श्रियवोनदंतांगुलैःसुर
म्यंरसकोटिकंवा ७० कुंडानिसांगानिकृतानिपूर्वे स्पष्टंतुकेनाप्युदितंनपद्मं तन्नोम्यहंतद्भु
जकोटिकर्णज्याचापबाणैर्गणितानुसारं ७१ रामांगुलैःकर्कटकेनवृत्तंसाकर्णिकास्याद्दतु
भिस्कवृत्तस्फः केसराण्यष्टमितानितस्मिन्द्व्यघानिवाषोडसंमितानि ७२ सूर्यांगुलव्यासदले
नवृत्तंसैर्वोर्ध्वभूमिर्गदितादलानां मन्वद्रिरामांबरसायकैर्यद्यवंगुलाद्यैश्चदलाग्रकाणि ७३ ५४

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्यासूत्रकंचोर्ध्वभुविप्रदद्यान्नवकरामाब्धिभिरंगुलाद्यैः ज्यामध्यतः पद्मदलाग्रंतरक्तबाणः
प्रदेयोग्निरसेषुवेदैः ७४ कर्णौशराग्र्यंगनगैर्मितौस्तौयौकोटि काभ्यांमिलितौशरांत्रात् तयो
र्ज्यकेसार्द्धयुगैः प्रकल्प्योतन्मध्यचापौगगनाब्धिबाणैः ७५ बाणाग्रयोःपार्श्वधनुर्युगंस्याद्वेदे
षुवेदांगुलपूर्वमानं पद्मंमनोज्ञंत्वमुनाविधेयंबुधैः स्थान्याकृतिकंप्रवच्मि ७६ पार्श्वश्रुती ५.६
६.७ वाथगुणौप्रकल्प्यतन्मध्यबाणौगगनाब्धिवेदैः तयोर्मुखासक्तगतेपचापेयवाग्निशुक्त
कैर्मितांगुलैस्तः ७७ प्रकारः बृहज्ज्याश्रुतावब्धिपर्वाकनीया ४ ज्यकामध्यतः षड्
यवैर्बोत्थबाणः धनुर्वेदरामैर्मितंस्याद्गुणाख्ये फलेकर्णशेषं १.७.६.७ लघुज्याप्रकल्प्य
७८ यवाभ्यांशिरोभ्यंतरेचांकितेस्यायवाङ्कनयुग्मांगुलंमध्यचापं भवेदेवमन्यत्कृतौ सूक्ष्मदृ
ष्ट्याविधेयोविधिस्तेनपत्रंमनोज्ञं ७९ कृत्वावृत्तसदलधृतिभिः पर्वभिर्दिग्विदिक्षोरंतर्ध्वौका
न्कुरुकुरुगुणांस्तत्तुरीयेतुरीये हृत्कपद्मस्तगममुदितवास्तुशास्त्रेत्रतस्यसत्रवृत्येदलाविरंचि
नानेत्ररम्यास्वबुध्या ८० मध्यवृत्तंदशशाशिभुजाभैर्द्वितीयंविलेख्यंतत्रज्याष्टौनगरसभुजे
द्विशिवन्हयंगुलाद्याः पत्राणिस्युःपृथगितिमयाप्रोच्यतेपत्रकाग्रेचापद्वंद्वंसममुभयतस्तद्विलो
मानुलोमं ८१ दिक्कृताशनशरैर्मितांगुलाद्यैस्त्रमःसचदलोर्ध्वधारिण्या ज्याष्टकंपनयेगजैर्द
लाग्याणिखंडितस्य १६।४ निर्मितांगुलैः ८२ येकोटिकाभ्यामिलितेदलाग्यात्पार्श्वज्यकेतेद्विन
गार्द्धिहृद्भिः बाणोस्व० वेदाब्धिगुणैस्तचापेद्व्यगाद्विरामाब्धिभिरंगुलाद्यैः ८३ प्रभावरतु
संगमैर्वलयमंगुलाद्यैःकुरुज्यकाष्टम पदांतराकरियुगांबरेद्वयिभिः मितानिभुजगैर्बहिर्विधु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दलानिजीवाद्धतः सरोजमिदमुन्नमंभवति नेत्ररम्यंस्फुटं ८४ इदमपूर्वमिहैकुशै शायद्वयमपी
५५ क्ष्यमुदंतुबुधाःसदा उपहसंत्वपरेकुधियः शरासनफलस्यविचारइहाप्यहो ८५ येच्चापंसगु
णंशिलीमुखयुतनाभ्यस्तमुर्वीतलेकिंतेस्युर्यशभागिनोरिविषयंयास्यंतिजेतुंबलात तैलैं
भ्यंकुटिलाकृतिक्षितिफलंसभ्येषुसभ्याःश्रियस्तेभ्योदूरतरमयांतिकुजनास्त्रस्तावि रुद्धो
त्सुकाः ८६ मयेरितंद्व्यग्रमणीयपद्यविलोक्यतुष्यंतुबुधाःश्रमज्ञाः क्षेत्रार्णवंबाहुबलेनतीर्
र्णास्तएवनूनंश्रमहारिणोमे ८७ भवस्यचतुःपत्रकतत्रजीवानृपाद्यंगपर्वादिकाश्चोर्ध्वभू
मौ ज्यकामध्यतःपत्रकाग्रांतवाणोररनाग्न्यब्धिपर्वात्मकःकोटिरूप ८८ दलाग्राच्च्युतीच्चा
पकोट्यग्रलग्नेहरि१० द्वाणबाह्वग्निपर्वादिकेस्तः भकल्पज्यकंतेचमध्यात्मदेयौशरौचंद्र
गपर्वादिकोच ८९ तयोरग्रतश्चापयुग्ममहेषा ११ गुलंजायतेवेदपत्रंयथोक्तं षडशोनतांक
र्णिकांप्रोद्धरवातं सरोजस्मृतंसर्वमत्रोपदेशात् ९० विधायपत्रंफलकेयथोक्तंवास्यादिनात
स्यतदंतराल मानेनतेनैवदलानिकुर्यान्नोचेच्छ्रमेणापिफलंनचेष्टं ९१ ईदृश्यायाष्टौसमु
दीरितानिदलानिचचारुमनोहराणि पृथक्पृथक्क्षेत्रफलानितेषामतीवसूक्ष्माणिविचिंत्य
यत्नात् ९२ कुंडासिद्धौचाज्वपत्रेधनुः क्षेत्रनवास्तवं ९३ शक्राक्षिभूवन्हिभिरंगुलाद्यैर्व्या
सार्द्धमानेनवलयेष्टदिक्षु दिक्षुचौलवद्वाष्टयुगांगुलाद्यैः सूत्रैर्गजास्यंवलयाद्बहिःस्यात् ९४ य
द्वापंचदशांशुगानलयुगैः पर्वादिभिर्मंडलंकृत्वाष्टदिग्विदिगंतरांकितमथोलक्ष्मैकमेकंत्यजेत्
वेदास्त्रद्वयमालिखेत्सममथौसध्यष्टदोष्णस्तथावृत्तंप्रोत्थमयाष्टकोणं कमिदंलक्ष्येसतां ५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्कृतं ९५ तिथियुगयुगनेत्रैर्व्यासखंडेन त्र्यन्नधृतिभजगुणान्चंद्रांशौकुंजै रंगुलाद्यैः शतमन्
स्वदिशिकोणः स्याद्यथापन्चकोणंविवलयमपहन्याच्छाकिनीभूतबाधां ९६ वियायद्वत्तमनु
वेदखांगैस्तत्रार्कवेदाक्षरसैर्नगास्तं माकचिन्हतः सत्पगुणंहिकुंडवृत्तंविनास्यादभिचारशांतौ
९७ सर्वेषुकुंडेषुचतुर्भुजस्यविस्तारतुल्यंखननं वदंति यदाद्ययामेखलयासहोक्तंतद्तुल्य
होमेपरिचिंतनीयं ९८ वेधानेष्टोदेवपकाध्वद्रक्षशाखाकोणस्तंभकूपप्रमाणा द्विघ्नोन्न
त्यान्तुल्यभूवायथोवाकुंडयादिस्यादंतरात्रेन्नदोषः ९९ कुंडाद्बहिः पूर्वमितोत्रकंठः परोद्विपर्वा
परितस्कतिस्नः स्युर्मेखलागोक्षयमांगुलैस्तास्तुंगास्तताश्चित्रियमैः क्रमेण १०० नेसंमता
गोंगगुणैस्कतुंगाः परे पतंगाष्टयुगैः क्रमेण ततोयुगैरंगुलिभिस्कतिस्नः सर्वार्थदाः सत्वरज
स्तमोकाः १०१ पत्समीरणयुगाग्निलोचनैरंगुलैर्हि विततास्तथोन्नताः पंचकेश्चिदुदिताग्
लाद्बहिः कुंडरूपसदृशाहिमेखलाः १०२ केचिद्वजगदुर्नवांगुलप्रोन्नताप्रथममेखलापराः
पूर्वपूर्वमलवोनितोन्नताः पूर्ववृद्धिविततताभवंतिताः ३ वेदविष्णुपदविक्रमांगुलैरुन्नतेच
विततेद्विमेखले तत्रविद्धिरुदितेरसांगुलैर्वायुगांगुलिभिरेकमेखला ४ कुंडमुत्तममुदी
रितंबुधैरग्निमेखलमथद्विमेखलं मध्यमंत्वधममेखलं कंबाम्हणादिषुहितंपरैःक्रमात्
१०५ दीर्घासूर्यमितांगुलान्वविततायोनिः किलाष्टांगुलातुंगास्यात्सकदंगुलापरिधिनाता
वृन्मितेनावृता गर्तोतामुकुरोदराश्रुतिदलाभ्यायुक्तमूले नताकुंडेकांगुलकाटिकाकचिदनेस्तंगायैः
व्यंगुलादिग्भिर्व्यंघ्निभिरंगुलीभिरुदितं योनेस्कमूलंततस्याद्विनचरकगास्नयुगलतास्मि

कुं॰ क॰ ५७ न्हितुल्यश्रवं वृत्तार्द्धद्वयमालिखेच्छ्रवणयोः संपातचिन्हाद्बहिश्चायाग्रात्क्रमगुणात्स्फुबोधिदलव द्रुम १६
त्कुंडान्तमांगंभवेत् १०७ यद्वापंचयवान्वितैर्भवभितैर्मूलंनतंचांगुलैस्तस्याद्वार्द्धविभितंनवश्र
शकलद्वंद्वंबहिर्भ्रामयेत् अग्रात्सूत्रयुगाद्गजोष्टसदृशीवायोनिकुंडोक्तवत्क्षेत्राद्गगनवांगु
लाद्बुधजनैःसाध्यामनोज्ञाभवेत् ८ यस्यापतिःपंचदशांगुलाश्चदिगंगुलाविस्तृतिसमि-
तिश्च विश्वांगुलाकैश्चिदुदीरितासायोनिर्मितार्कांगुलमेखलायां ९ यूकद्वियोनद्वियवाढ्यसू-
र्यांगुलैस्ततांमूलमितिंविधाय पूर्वोक्तवद्बोधदलाकृतिःसायोनिःपतगांगुलमेखलायां ११०
दलादयशक्रांगुलसंमितावामूलंविधायानुचरेद्गजोष्टीं साप्यर्कतुल्यांगुलमेखलायांकुंडोक्त
वत्साईशतांगुलाढ्या ११ पूर्वैर्नालोकितायासायोनिःसंसाधितामया बुद्धिमद्भिर्विलोक्यतन्न
स्यांयज्ज्ञायतेफलं १२ प्राग्यमान्वार्यकुंडानामाग्नेयस्याभगस्यच योनिर्दक्षिणतस्तेषांप
चान्येषांतुपश्चिमे ११३ समुद्रांगुलीमूलमेकांगुलाग्रंतलाद्योनिमध्यांतमतःसरंध्रंसमु-
त्पिंडयुग्मंजगुर्नालमेकेतथानोशुभंकुंडमेकेवरांगं ११४ कुंडांतराभिनिहितासरसीरुहत्व
भावास्वकुंडसदृशाततिरायतिश्च वेदांगुलानिजदलोन्नतिरब्जनोनाभिर्नयोनिरुदितांकिल
योनिकुंडे ११५ वेदास्रबाणमात्रंकरमितमथवारत्निमात्रंश्रुतिभ्यात् स्यंतुगमतंगैरिषुभि
रपियुगैर्वांगुलैर्वांगुलंनसूक्ष्माभिर्वालुकाभिर्गदितमरुणमृच्चूर्णकैर्वल्यहोमेकुंडाभावेचनित्ये
ल्पवितितिविध्कादिशिस्थंडिलंप्राक्प्लवंवा ११६ हेम्नःस्रुक्कुंभारजतोतभवावानाम्रो भवावा ५६
यदिमृन्मयावा दृढाःस्रुपद्मास्वसितांकरंध्रेहीनाश्चरक्तानिजलक्षणाढ्याः ११७ मूलपत्त

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

गैश्वमुखेमतंगैस्तौन्व्येनृपैः पुष्करकेस्त्वचंद्रैः तुल्यांगुलैर्पैंकलशाःसमाः स्युस्तएवसर्वेषुशुभे-
षुयोज्याः ११८ कुंभद्वंद्वसाकरं सर्वदिक्षुस्थाप्यं रत्नैः पल्लवैः सत्पधान्यैः पुष्पस्रग्भिर्दिव्यगं-
धौषधीभिर्वस्त्रैणाढ्यस्वर्णगर्भं स्रुचीभिः ११९ हेरंबांबापूजनेभीष्टवेद्यातुल्यास्तायांकर्णसू-
त्रेप्रदेये तत्संपाताद्वापुसूत्रेचभद्रंयूकान्यूनैः सार्द्धरुद्रांगुलैःस्यात् २० मध्याद्रौक्ष्यांयूकया-
हीनरुद्रैः सार्द्धैः खेटंवन्हिसूत्रैंगुलाद्यैः हेरंबारव्यपाणिजाक्षं दुभिश्च २०।५।१ कुंडनैत्र-
त्याच धृत्याब्धिचंद्रैः २१ पंचत्रिंशद्वर्गगैरंगुलाद्यैः केंद्राण्येवं कर्णसंपाततः स्युः क्षेत्रंया-
त्यभद्रपीठेद्विहस्तंतद्वत्पीठंखेचराणांविदध्यात् २२ हेरंबस्याद्वस्तिमात्रंयुगास्रमप्याहुः स-
र्वाण्यकंपर्वोन्नतानि कूर्मपृष्ठान्युतमहस्तमात्रंकुंडंकार्यंस्थंडिलंवायथोक्तं २३ विप्रादीनांभि-
नाभिन्नानिकुंडान्याहुः पूर्वेखेटपक्षमसंगात् तस्मात्तेषांखेटपीठादिकानांकेंद्राण्येवंभिन्नभिं-
नानिचस्युः २४ पिंडैः २८ विप्राणांचभैःक्षत्रियाणांषट्विंशद्भिस्तद्विशामंघ्रिजानांतत्वैः-
२५ कुंडेकुंडखेटांतरयास्त्रिंशद्भिःस्यात्पर्वभिःसर्वतोत्र २५ षड्विंशत्सप्तदुवेदैर्द्विजानां षड्विंश-
द्वेदाग्निभिर्वक्षेत्रे षड्विंशद्भूर्वेदगुणैर्विशांचपंचत्रिंशत्तर्कपंचेषुवेदैः २६ शूद्रागांतान्यंगुला-
द्यैः स्वकेंद्राण्यकान्येवंवदिमध्याद्दिदिक्षु तेभ्यःपीठान्युक्तवच्चापिकुंडकेभ्यिंद्वरंबधनैः १७
पीठमुक्तं २७ भूमिवेदनवषोडषेकरेभूयमाग्नियुगसप्तगुणाजिनाः संभवंतिहिभुजाःक्रमेण-
तेपर्वभिःसमयुगस्त्रिकुंडके २८ स्रुराःपर्वताःसागराभूनगाःस्युर्द्विहस्तेशराशाकाब्धयो९
बुनिवेदाःगुणाःपंचवेदास्त्रिहस्तेत्रिबाणाःशराद्रिःवूताःपंचकेषड्युगानि २९ गजाक्षारसाद्रौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुणाद्दौरसाः षट्करेवन्हितर्का गुणाः सप्तसत्य स्मृतांसत्पहस्तेद्धहस्तेद्विनर्कीनगाः खंगुणाः द्रुम
सायकास्तर्कतुल्याः १३० करेदिड्मितेरामपृथ्वीधराद्दौशराः सायकाद्दौगुणः पर्वपूर्वाः भुजा
स्तक्ष्ममूलास्मृताः क्षेत्रसिध्यै युगास्त्राणितुल्यानि तैश्चोत्तमानि १३१ आसीत्कश्यपवंशजः क्षि-
तितले श्रीमानुदीच्याग्रणी गोविंदः श्रुतिविन्तदात्मज इहाभूद्व्यासनारायणः तत्सूनुर्निगमक्रिया
स्तनिपुणः कूकाभिधस्तत्सुतः शुक्लो माधवसंज्ञको रचितवान्श्रीकुंडकल्पद्रुमं १३२ भ्रांताभ्रश
ये गणिताटवीषु फलाशया दिग्विकलाश्चतेषां कृतेस्तरवेनेष्टफलः शिवाग्रे तापीपुरे रोपितः कल्प
वृक्षः ३३ संवर्द्धितोयः कृपया शिवेन फलप्रदोसावपि बालकानां शिवः प्रसंनो भवतीह येषां ते-
षां फलाप्तिर्नहि संशयात्र १३४ रविघन १७१२ मितवर्षे विक्रमार्के प्रयाते नगनगतिथितुल्ये
१५७७ शाककाले प्रवृत्ते शरदि मनुजमाने मन्मथे चेषशुक्ले फणितिथियुतचंद्रे कुंडकल्पद्रुमो-
भूत् ११२ इति कुंडकल्पद्रुमः १६ श्रीदत्तात्रयार्पणमस्तु श्रीशुभं भवतु

अथ कुंडरचनाख्यो ग्रंथः १७

श्रीगणेशाय नमः श्रीर्जयतु चतुरस्रसाधनमाह सूत्रेमाद्विश्लोक १ प्राक्सूत्रांतद्वयात्सूत्र
मध्यं किंचित् कर्कटादिना पार्श्वद्वये दत्त्वार्द्धद्वयभ्रमान्मश्यद्वयं तत्र यातत्रातिर्यक् सूत्रं प्राक् सूत्रतु- ५७
ल्यं दद्यात् प्राकउदक् सूत्रद्वयसंपातात् मध्यादिइष्टचतुरस्रव्यासार्द्धमानेन सूत्रेण कर्कटेन वाच-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्दिक्षु चिन्हचतुष्टयं कुर्यात् प्राक्दक्षिणचिन्हस्थसूत्रेण कर्कटेन चाग्नेय्यां मत्स्यं कुर्यात् दक्षिणप्रती
चीचिन्हस्थेन नैरृत्यां प्रत्यगुदक्चिन्हस्थेन वायव्यां प्रागुदक्स्थेनैशान्यां एवं मत्स्यचतुष्टयं संपाद्य
तन्मध्यपतितसूत्रचतुष्टयेन समचतुरस्रं स्यात् अथ योनिकुंडमाह अष्टोनद्विशती स्या
र्थः चतुःकोणस्य मध्यसूत्रं अष्टोनद्विशतांशं १९२ तत्त यापुरस्तात् तावत्प्रमाणाः अष्टत्रिं ३८ शत
भागाः देवाः इमान् लवान् अर्द्धशः १९ अर्द्धशः १९ श्रोण्यौः एधयंतु एकोनविंशतिभागाः श्रोण्योः प्र
त्येकं दक्षिणोत्तरं वर्द्धनीया इत्यर्थः श्रोण्योः अग्रपर्यंतं सूत्रद्वयेस्थिते त्रिकोणं भवति मध्यदक्षिणश्रो
